Title महाभारते गजेन्द्रमोक्षस्तोत्रम्

Author

Extent ६ Age

Subject महाभारतम् सम्पूर्णम्

नं० १०५१-घ

महाभारते गजेन्द्रमोक्षाख्य स्तोत्रम् (महाभारतम्)
पत्राणि ६ (सम्पूर्णम्)

नं० १०५१-घ

६ पत्र

श्रीगणेशाय नमः ॐ नमो भगवते वासुदेवाय शतानीकोवाच मयाहि देवदेवेश वि-
ष्णोरमिततेजसः श्रुताः संभूतयः सर्वा गदतस्तव सुव्रत १ यदि प्रसन्नो भगवाननुग्रा-
ह्योस्मि वा यदि तदहं श्रोतुमिच्छामि नृणां दुःस्वप्ननाशनं २ स्वप्नानि सुमहाभाग दृश्यंते
ये शुभाशुभाः फलानि तस्य यच्छंति तद्गुणान्येव भार्गव ३ तादृक्पुण्यं पवित्रं च नृणामति
शुभप्रदं दुःस्वप्नाश्च शमं यांति तन्मे विस्तरतो वद ४ शौनकोवाच इदमेव महाभाग पृ-
ष्टवांस्ते पितामहः भीष्मं धर्मभृतां श्रेष्ठं धर्मपुत्रो युधिष्ठिरः ५ युधिष्ठिरोवाच जितं ते पुं-
डरीकाक्ष नमस्ते विश्वभावन नमस्तेस्तु हृषीकेश महापुरुष पूर्वज ६ आद्यं पुरुषमीशान
पुरुहूतं पुरातनं ऋतमेकाक्षरं ब्रह्म व्यक्ताव्यक्तं सनातनं ७ असच्च सच्च विश्वं यन्नित्यं स-
दसतः परं परं पुराणं स्रष्टारं पुराणं परमव्ययं ८ मांगल्यं मंगलं विष्णुं वरेण्यं वरदं शुभं नम-
स्कृत्य हृषीकेशं चराचरगुरुं हरिं ९ प्रवक्ष्यामि महापुण्यं कृष्णद्वैपायनस्य च येनोक्तेन श्रु-
तेनापि नश्यंते सर्वपातकैः १० नारायणसमो देवो न भूतो न भविष्यति एतेन सत्यवाक्ये-
न सर्वार्थान्साधयाम्यहं ११ किं तस्य बहुभिर्मंत्रैः किं तस्य बहुभिर्व्रतैः नमो नारायणायेति
मंत्रः सर्वार्थसाधकः १२ जज्ञे बहुज्ञं परमत्युदारं यद्वीपमध्ये श्रुतमात्मयोगात् पराशरा-
द्गंधवती महर्षिं तस्मै नमोज्ञानतमोनुदाय १३ नमो भगवते तस्मै व्यासायामिततेजसे यस्य
प्रसादाद्वक्ष्यामि नारायणकथामिमां १४ जनमेजयोवाच किं जपन्मुच्यते पापात्किं तपन्
सुखमश्नुते दुःस्वप्ननाशनं पुण्यं श्रोतुमिच्छामि मानद १५ वैशंपायनोवाच देवव्रतम

ग.मो. हाप्राज्ञंसर्वशास्त्रविशारदं विनतेनोपसंगम्यपर्यपृच्छद्युधिष्ठिरः १६ युधिष्ठिरोवाच दुः
१ स्वप्नदर्शनंघोरमवेक्ष्यभरतर्षभ प्रयतःकिंजपेज्जाप्यंविबुध्यःकिमनुस्मरेत् १७ पिताम
हप्रसादेनबुद्धिर्मेशोभवेत्मम तदहंश्रोतुमिच्छामिब्रूहिमेवदतांवर १८ भीष्मोवाच शृ
णुराजन्महाबाहोवर्णयिष्येदिशांतिकं दुःस्वप्नदर्शनंज्ञाप्यंयद्भानित्यंसमाहितैः १९ अ
त्राप्युदाहरंतीममितिहासंपुरातनं गजेंद्रमोक्षणंपुण्यंकृष्णस्याक्लिष्टकर्मणः २० सर्व
रत्नमयःश्रीमान्त्रिकूटोनामपर्वतः सतुपर्वतराज्यस्यसुमेरोर्भास्करद्युतेः २१ क्षीरोदजल
वीच्यग्रैर्धौतामलशिलातलः उत्थितःसागरंभित्वादेवर्षिगणसेवितः २२ अप्सरोभिःप
रिवृतःश्रीमान्प्रस्रवणाकुलः गंधर्वैःकिंनरैर्यक्षैःसिद्धैश्चारणपन्नगैः २३ मृगैःसिंहैर्गजेंद्रै
श्चवृत्तमात्रोविराज्यते पुन्नागैःकर्णिकाकारैश्चसदिव्यैर्बिल्वपाटलैः २४ चूतनिंबकदंबै
श्चचंदनागुरुचंपकैः सालैस्तालैस्तमालैश्चतरुभिश्चार्जुनैस्तथा २५ बकुलैःकुंदपुष्पैश्चस
रलैर्देवदारुभिः मंदारकुसुमैश्चान्यैःपारिजातैश्चसर्वतः २६ एवंबहुविधैर्वृक्षैःशोभितःस
मलंकृतः नानाधात्वंकितैःशृंगैःप्रस्रवद्भिःसमंततः २७ ऋक्षैःशाखामृगैःसिंहैर्मातंगैश्चस
दामदैः जीवंजीवाकसंघुष्टंचकोरशिखिनादितं २८ पद्मरागसमःप्रख्यज्वालापुंजमिवोत्थि
तं तत्रैकंकांचनंशृंगंसेवतेयंदिवाकरः २९ नानापुष्पैःसमाकीर्णंनानागंधैःसमाकुलं॥
द्वितीयंराजतंशृंगंसेवतेयंनिशाकरः ३० पांडुरांबुधसंकाशंतुषाराचलसंनिभं वज्रेंद्रनी
लवैडुर्यतेजोभिर्भासयन्नभः ३१ तृतीयंब्रह्मसदनंप्रकृष्टंशृंगमुत्तमं पद्मरागसमंप्रख्यंता १

रागणसमन्वितं ३२ न तत्कृतघ्नाः पश्यंति तं शैलं नास्तिकाः नातप्ततपसो लोके ये च पा
पकृतो नराः ३३ नानाराधितगोविंदं शैलं पश्यंति नराः तस्य सानुमतः पृष्टे सरः कांचनपं
कजं ३४ कारंडवसमाकीर्णं राजहंसोपशोभितं मत्तभ्रमरसंघुष्टं चकोरशिखिनादितं ३५
कमलोत्पलकल्हारपुंडरीकोपशोभितं कमलैः शतपत्रैश्च कांचनैः समलंकृतं ३६ पत्रैर्म
रकतप्रख्यैः पुष्पैः कांचनसन्निभैः गुल्मैः कीचकवेणूनां समंतात्परिवारितं ३७ अत्यद्भुतं
महास्थानं विचित्रशिखराकुलं शतयोजनविस्तीर्णं दशयोजनमायतं ३८ खातेन द्विगुणं
प्रोक्तं शरद्योरिवनिर्मलं उपहारायदेवानां सिद्धाद्यर्चितपंकजं ३९ तस्मिन्सरसि दुष्टात्मा वि
रूपोंतर्जलाशयः आसीद्ग्राहो गजेंद्राणां दुराधर्षो महाबलः ४० अथ दंतोज्वलमुखः कदाचि
द्गजयूथपः आजगाम गजाक्रांतः करेणुपरिवारितः ४१ मदस्रावी जलाकांक्षी पादचारी
च पर्वतः वासयन्मदगंधेन महानैरावतोपमः ४२ गजोंजनसंकाशो मदाचलितलोचनः
तृषितः पातुकामोसावतीर्णश्च तत्सरः ४३ ग्रहणानस्तस्य तत्तोयं ग्राहः स उदययत सु
नीलपंकजवने यूथमध्यगतः सुखी ४४ गृहीतस्तेन रौद्रेण ग्राहेणाव्यक्तमूर्तिना पश्यं
तीनां करेणूनां क्रोशंतीनां च दारुणं ४५ नीयते पंकजवने ग्राहेणातिबलीयसा गजश्चा
कर्षते तीरं ग्राहश्चाकर्षते जलं ४६ तयोरासीन्महायुद्धं दिव्यवर्षसहस्रकं दारुणैः सयुतः
पाशैर्निःप्रयत्नगतिः कृतः ४७ वेष्ट्यमानः सघोरैस्तु पाशैर्नागो दृढं तथा विस्फूर्जयन्य
थाशक्त्या विक्रोशंतं महारवं ४८ व्यथितः स निरुत्साहो गृहीतो घोरकर्मणा परमापद

मापन्नोमनसाचिंतयद्धरिं ४९ सतुराजवरःश्रीमान्नारायणपरायणः तमेवशरणंदेवंग
तःसर्वात्मनातदा ५० एकाग्रेणनिगृहीतात्माविशुद्धेनांतरात्मना जन्माजन्मांतराभ्यासाद्भक्ति
मानारूढध्वजे ५१ नात्यंदेवंमहादेवान्पूजयामासकेशवात् दिग्बाहुंस्वर्गमूर्धानंभूपादंग
गनोदरं ५२ आदित्यचंद्रनयनमनंतंविश्वतोमुखं अनंतात्मानमेघाभंशंखचक्रगदा
धरं ५३ सहस्रयुगनामानमादिदेवमजंविभुं प्रगृह्यपुष्करागेणकांचनंकमलोत्तमं ५४
नैवेद्यंमनसाध्यात्वापूजांकृत्वाजनार्दनं आपद्विमोक्षमन्विच्छगजस्तोत्रमुदीरयेत् ५५॥
गजेंद्रउवाच नमोमूलप्रकृतयेअजितायमहात्मने अनाश्रयायदेवायनिःस्पृहायनमोनमः
५६ नमआद्यायबीजायआर्षेयायप्रवर्तिने अनंतरायचैकायअव्यक्तायनमोनमः ५७ न
नमोगुह्येयगुह्यायगुणायगुणवर्तिने अतर्क्यायाप्रमेयायपुराणायनमोनमः ५८ नमःशि
वायशांतायनिश्चिंताययशस्विनी सनातनायरूपायअतुलायनमोनमः ५९ नमोजगत्प्रतिष्ठा
यगोविंदायनमोनमः नमोस्तुपद्मनाभायसांख्ययोगोद्भवायच ६० विश्वेश्वरायदेवायशिवा
यहरयेनमः नमोस्तुतस्मैदेवायनिर्गुणायनमोनमः ६१ नमोदेवाधिदेवायस्वभावायनमो
नमः नारायणायविश्वायदेवानांपरमात्मने ६२ नमोनमःकारणवामनायनारायणायामि
तविक्रमाय श्रीशार्ङ्गचक्रासिगदाधरायनमोस्तुतस्मैपुरुषोत्तमाय ६३ गुह्यायवेदतिलका
यमहोदरायसिंहायदैत्यनिधनायचतुर्भुजाय ब्रह्मेंद्ररुद्रमुनिचारणसंस्तुतायदेवोत्तमायवि
रजायनमोच्युताय ६४ नागेंद्रदेहशयनासनसुप्रियायगोक्षीरहेमशुकनीलघनोपमाय॥ 

पीतांबरायमधुकैटभनाशनायविश्वायचारुमुकुटायनमोक्षराय ६५ नाभिप्रजातकमल
स्थचतुर्मुखायक्षीरोदकार्णवनिकेतनशोभनाय नानाविचित्रमुकुटांगदभूषणाययोगी
श्वरायविरजायनमोवराय ६६ भक्तिप्रियायवरदीप्तिसुदर्शनायफुल्लारविंदविपुलायतलो
४ चनाय देवैंविघ्नशमनोघतपौरुषायनारायणायविरजायनमोच्युताय ६७ नारायणाय
नरलोकपरायणायकालायकालकलनायतलोचनाय रामायरावणविनाशकृतोघमा
यधीरायधीरतिलकायमहोदराय ६८ पद्मासनायमणिकुंडलभूषणायकंसांतकायशि
शुपालविनाशनाय गोवर्धनासुरशत्रुविनाशनायदामोदरायविरजायनमोवराय ६९
पद्मासनायत्रिदशायनायलोकायनायात्मभवोद्भवाय नारायणायात्महितायनायमहा
वराहायनमस्करोमि ७० कूटस्थमव्यक्तमचिंत्यरूपंनारायणंकारणमादिदेवं युगांत।
शेषंपुरुषंपुराणंतंवासुदेवंशरणंप्रपद्ये ७१ अदृश्यमछेद्यमनंतमव्ययंमहर्षयोत्र
त्नमयंसनातनं वदंतियंवैपुरुषंपुराणंतंवासुदेवंशरणंप्रपद्ये ७२ उज्जिष्ठतेनस्यज।
लोरुकुक्षेर्महावराहस्यमहींविदार्य विध्वन्वतोवेदमयंशरीरंलोकांतरस्थांमुनयोवदंति
७३ योगेश्वरंचारुविचित्रमौलिंज्ञेयंसमत्वंप्रकृतेःपरस्थं क्षेत्रज्ञमात्मप्रवरंवरेण्यंतंवा
सुदेवंशरणंप्रपद्ये ७४ कार्यक्रियाकारणमप्रमेयंहिरण्यबाहुंवरपद्मनाभं महाब।
लंवेदनिधिंसुरोत्तमंव्रजामिविष्णुंशरणंजनार्दनं ७५ किरीटकेयूरमहार्हनिष्कैरत्नं
तमालंकृतसर्वगात्रं पीतांबरंकांचनभक्तिचित्रंमालाधरंकेशवमभ्युपैमि ७६ ॥

मयोद्भवं वेदविदो वरिष्ठमादित्यचंद्राग्नियमप्रभावं योगात्मकं सांख्यविदो वरिष्ठं प्रभुं प्र
पद्ये च्युतमात्मवंतं ७७ यदक्षरं ब्रह्मविदंति सर्वगं निष्ठाय यन्मत्य मुखात्प्रमुच्यते त
मीश्वरं मुक्तमनोपमैर्गुणैः सनातनं लोकगुरुं स्मरामि ७८ श्रीवत्सांकं महादेवं वेदगु
ह्यमनोपमं प्रपद्ये सूक्ष्ममचलं वरेण्यमवरप्रदं ७९ नमस्तस्मै वराहाय लीलयोद्धरते
महीं खुरमध्यगतो यस्य मेरुः खरायते ८० प्रभवं सर्वभूतानां निर्गुणं परमेश्वरं प्र
पद्ये मुक्तसंगानां यतीनां परमां गतिं ८१ भगवंतं गुणाध्यक्षं मपरं परमं पदं शरण्यं शरणा
र्तीनां प्रपद्ये भक्तवत्सलं ८२ त्रिविक्रमं त्रिलोकेशं लोकानां प्रपितामहं योगात्मानं महा
त्मानं प्रपद्येहं जनार्द्दनं ८३ आदिदेवमतं शुभ्रं व्यक्ताव्यक्तं सनातनं नारायणमणीयांसं प्र
पद्ये ब्रह्मणः प्रियं ८४ अकूपारायदेवाय नमः सर्वमहात्मने प्रपद्ये देवदेवेशं मणीयांस
मणोर्यथा ८५ एकाय लोकतत्वाय परतः परमात्मने नमः सहस्रशिरसे अनंताय नमो
नमः ८६ तमेव परमं देवमृषयो वेदपारगाः कीर्त्तयंति च यं सर्वे ब्रह्मादीनां परायणं ८७
नमस्ते पुंडरीकाक्ष भक्तानामभयंकर सुब्रह्मण्य नमस्तेस्तु त्राहि मां शरणागतं ८८ ता
वद्भवतु मे दुःखं चिंता संसारसागरे यावत्कमलपत्राक्षं न स्मरामि जनार्द्दनं ८९ भीष्मो
वाच भक्तिं तस्य तु संचिंत्य नागस्यामोघसंस्तवात् प्रीतिमान्भगवान्राजन्नूत्वा चक्रगदा
धरः ९० आरुह्य गरुडं विष्णुराजगाम सुरोत्तमः सान्निध्यं कल्पयामास तस्मिन्सरसि
लोककृत्कृ ९१ ग्राहग्रस्तं गजेंद्रं च ग्राहं च लत लाशयात् उज्जहार प्रमेयात्मा तरसा मधु ३

सूदनः ९२ जलस्थं दारयामास ग्राहं चक्रेण माधवः मोचयामास नागेंद्रं पाशेभ्यः शरणाग
तं ९३ स हि देवलशापेन हूहूर्गंधर्वसत्तमः इदमस्य परं गुह्यं राजन्पुण्यतमं भवेत् ९४ यु
धिष्ठिरोवाच कथं शापोद्भवं नागं गंधर्वाणां महात्मनां एतदिच्छाम्यहं श्रोतुं विस्तरेण महा
त्मना ९५ भीष्मोवाच हाहाहूहू इति ख्यातौ गीतवाद्यविशारदौ इति तौ शापितौ तेन देवले
न महात्मना ९६ उर्वशी मेनका रंभा तथा चान्याप्सरोगणाः शक्रस्य पुरतो राजन्नृत्यंतश्च
सुमध्यमाः ९७ ततस्तौ गायनानौ तु गंधर्वौ राजसद्मनि अन्योन्यं चक्रतुः स्पर्धां शक्रस्य।
पुरतस्तदा ९८ आवयोरुभयोर्मध्ये कः श्रेष्ठो गीतवाद्ययोः तद्वदस्व सुरज्येष्ठ ज्ञात्वा गीत
स्य लक्षणं ९९ गंधर्वयोर्वचः श्रुत्वा प्रत्युवाच शतक्रतुः युवयोर्गीतवाद्येषु विशेषो नोप
लक्ष्यते १०० एक एव मुनिश्रेष्ठो देवलो नाम नामतः युवयोः संशयच्छेत्ता भविष्यति न सं
शयः १ ततस्तु तौ शक्रवचो निशम्य प्रणम्य राजन् शिरसा सुरेश्वरं गतौ सुहृष्टौ जयकां
क्षिणौ तौ यत्राश्रमे तिष्ठति स द्विजाग्र्यः २ ततो दृष्ट्वा मुनिश्रेष्ठं देवलं संशितव्रतं अभिवा
द्य महात्मानं प्रोचतुः पार्श्वसंस्थितौ ३ शक्रेण प्रेषितौ देव त्वत्समीपे द्विजोत्तमः एकस्य च
जयं देहि यस्ते मनसि वर्त्तते ४ पृथक्करं तौ गायंतौ सुचिरं मधुरस्वरं न किंचिद्वदते वाक्यं मु
निर्मौनस्य धारणात् ५ अ एवन्नापि परं तेषां न किंचिद्वदते मुनिः तदा तौ कुपितौ तस्य दे
वलस्य महात्मनः ६ ऊचतुस्तौ तदा वाक्यं गंधर्वौ कालनोदितौ मूढोयं नाभिजानाति नि
श्चयं द्वंद्वगीतयोः ७ निशम्य तद्वचस्तेषां गंधर्वाणां मदान्वितं कोपादुत्थाय विप्रेंद्रः दं

ग.मो. वचनमब्रवीत् ८ एवहूहूदुरात्मातुग्राहत्वंयातुमूढधिः त्वमेवगजराजस्तुभवस्वगिरिग
४ ह्वरे ९ ततस्तौशापितौतेनदेवलेनमहात्मना प्रणम्यशिरसाविप्रंगंधर्वोविदमूचतु १०
५ भूमंडलेगतौत्वावांप्रसादंकुरुसत्तम निश्चयंवदविप्रेंद्रयेनशापाद्विमुच्यते ११ ततस्तौ
पुरुषौदृष्ट्वाउभौशापभयान्द्विजः प्रत्युवाचमुनिश्रेष्ठोगंधर्वौलोभयान्वितं १२ मेरुपृष्ठे
सरोरम्यंबहुवृक्षसमाकुलं नानापक्षिनिनादाढ्योद्वितीयइवसागरः १३ तस्मिन्सरोव
रेरम्येनित्यंग्राहोविशिष्यते तृषार्त्तस्तत्रमातंगोगमिष्यतिनसंशयः १४ तदासौदेवदे
वेशंतोष्यतेनात्रसंशयः ततोनारायणःप्रीतःशापात्त्वोमोचयिष्यति १५ इत्युक्तमृषि
णातेनवरेणरूदपद्यत एवंपरावतीभूत्वाश्रुत्वासीद्भगवानिह १६ क्रोधोपिवरतुल्य
स्तुमहतांतुप्रयच्छति आपद्विमुक्तोयुगपद्गजोगंधर्वएवच १७ गतोपियक्षतांयातः।
श्रीकृष्णेनविमोचितः तस्माच्छापाद्विनिर्मुक्तःप्रागिवाविकृतोभवत् १८ सचस्वंस्व
वपुःप्राप्यप्रणिपत्यजनार्दनं गजोगंधर्वराजश्चपदंनिरत्यमागतः १९ प्रीतिमान्पुं
डरीकाक्षःशरणागतवत्सलः अभयंतत्रदेवेशस्ताभ्यांचैवप्रपूजितः २० इदंचैवमहाबा
होदेवस्यचप्रभाषितं भजंतंगजराजानंवदंतंमधुसूदन २१ श्रीभगवानुवाच येमां
त्वांचसरश्चैवग्राहस्यचविदारणं आत्मकीचकवेणूनांरूपंचैवममाश्रियं २२ अश्व
त्थंभास्करंगंगांनैमिषारण्यपुष्करं प्रयागंब्रह्मतीर्थंचदंडकारण्यमेवच २३ पुराणंरा
मचरितंभरताख्याननुत्तमं विभूतिंविश्वरूपंचसत्यराजमनुस्मृतिं २४ प्रणवंचकुरु ४

क्षेत्रं गरुडं मेरुपर्वतं रूपं कांचनगुल्मानां रूपं मेरोः कृतस्य च २५ ये स्मरिष्यंति मनुजाः प्र
याताः स्थिरबुद्धयः दुःस्वप्नो नश्यते तेषां सुस्वप्नश्च भविष्यति २६ अनिरुद्धं गजेंद्राहं वासुदे
वं महाद्युतिं संकर्षणं महात्मानं प्रद्युम्नं च तथैव च २७ मत्स्यं कूर्मं वराहं च वामनं तार्क्ष्यमे
व च नारसिंहं गजेंद्रं च सृष्टिसंहारकारकं २८ विश्वरूपं हृषीकेशं गोविंदं मधुसूदनं त्रि
दशैर्वंदितं देवं दृढभक्तिमनोपमं २९ वैकुंठं दुष्टदमनं भक्तिदं मधुसूदनं एतानि प्रातरुत्था
य संस्मरिष्यंति ये नराः ३० सर्वपापैः प्रमुच्यंते पुण्यकर्मत्वमवाप्नुयात् भीष्मोवाच एवं
मुक्त्वा महाराज गजेंद्रं मधुसूदनः ३१ स्पर्शयामास हस्तेन गजं गंधर्वमेव च तौ च पृष्ठे ततः
सद्यो माल्यांबरधरावुभौ ३२ तमेव मानसं प्राप्य जग्मतुस्त्रिदशालयं ततो दिव्यवपुर्भूत्वा
हस्तिराड् परमं पदं ३३ गच्छति स्म महाबाहो नारायणपरायणः ततो नारायणः श्रीमान्मो
क्षयित्वा गतोत्तमं ३४ ऋषिभिः स्तूयमानोऽसौ वेदगुह्यपदाक्षरैः ततस्तु भगवान्विष्णुर्दुर्विज्ञे
यगतिः प्रभुः ३५ शंखचक्रगदापाणिरंतर्ध्यौन युधिष्ठिरः राजेंद्रमोक्षणं दृष्ट्वा सर्वे प्रांज
लयस्तदा ३६ ववंदिरे महात्मानं प्रभुं नारायणं परं विस्मयोत्फुल्लनयना प्रजापतिपुरःसराः
३७ यस्त्विदं शृणुयान्नित्यं प्रातरुत्थाय मानवः प्राप्नुयात्परमां सिद्धिं दुःस्वप्नस्तस्य नश्यति ॥
३८ गजेंद्रमोक्षणं पुण्यं सर्वपापप्रणाशनं आचयेत्प्रातरुत्थाय दीर्घमायुरवाप्नुयात् ३९
कृते न हि कुरुश्रेष्ठ स्मृतेन कथितेन च गजेंद्रमोक्षणेनैव सद्यः पापात्प्रमुच्यते ४० मया
ते कथितं राजन्पवित्रं पापनाशनं कीर्तयस्व महाबाहो गजेंद्रस्य महात्मनं ४१ चरितं पुण्य

ग.मो. कर्माणिपुष्कलंचरंतेयत्राः कीर्तिमान्सुंदरीकाक्षोगजेंदुःखात्प्रमुक्तवान् ४२ वैशंपायनो।
५ वाच एतत्कथ्यामहाबाहोभारतानांपितामहात् गजेंद्रमोक्षणंराजाकुंतीपुत्रोयुधिष्ठिरः ४३
भ्रातृभिःसहितःसम्यक्ब्राह्मणैर्वेदपारगैः पूजयामासदेवेशंपार्श्वस्थंमधुसूदनं ४४॥
5 विस्मयोत्फुल्लनयनाःश्रुत्वानागस्यमोक्षणं ऋषयस्तुमहाभागासर्वेप्रांजलयस्तदा ४५
अजंवरेण्यंवरपद्मनाभंमहाबलंवेदनिधिंसुरोत्तमं तंदेवगुह्यंपुरुषंपुराणंववंदिरेवेद
विदांवरिष्ठं ४६ एतत्पुण्यंमहाबाहोजनानांपुण्यकर्मणां दुःस्वप्नदर्शनेघोरेश्रुत्वापापा
त्प्रमुच्यते ४७ तस्मात्त्वंहिमहाराजप्रपद्येशरणंहरिं विमुक्तःसर्वपापेभ्योह्याप्स्यसेपरमंप
दं ४८ यदामहाग्राहगृहीतकातरंसपुष्पितंपद्मवनेमहाद्विपं विमोक्षयामासगजंजनार्द
नः स्मरामिदुःस्वप्नविनाशनंहरिं ४९ परंपुराणंपरमंपवित्रंपुराणमीशंसुरलोकना।
थं सुरासुरैरर्चितपादपंकजंसनातनंलोकगुरुंस्मरामि ५० वरगजस्मरणाद्धिमुक्ति
हेतोःपुरुषवरस्तुतिदिव्यदेहगीतं सततमभिपठंतियेतुतेषामाजन्ममरणांतिकृपाय
नस्यात् ५१ धर्मेदृढबद्धमूलोवेदस्कंधःपुराणमखशाखाढ्यः क्रतुकुसुमोमोक्षफलो
मधुसूदनपादपोजयति ५२ नमोब्रह्मण्यदेवायगोब्राह्मणहितायच जगद्धितायकृ
ष्णायगोविंदायनमोनमः ५३ आर्ताविषण्णाःशिथिलाश्चभीताघोरेषुचव्याधिषुवर्त्त
मानाः संकीर्त्यनारायणशब्दमात्रंविमुक्तदुःखासुखिनोभवंति ५४ वेदेरामायणेचै ५
वपुराणेभारतेतथा आदौमध्येतथाचांतेहरिःसर्वत्रगीयते ५५ एकोपिकृष्णस्यकृ

ग॰मो॰ तप्रणामोदशाश्वमेधावभृथेनतुल्यः दशाश्वमेधीपुनरेतिजन्मकृष्णप्रणामीनपुनर्भ
६ वाय ५६ सर्वरत्नमयोमेरुःसर्वाश्चर्यमयंनभः सर्वतीर्थमयीगंगासर्वदेवमयोहरिः ॥
५७ आकाशात्पतितंतोयंयथागच्छतिसागरे सर्वदेवनमस्कारंकेशवंप्रतिगच्छति ५८॥
6 गीतासहस्रनामास्मिस्तवराजोह्यनुस्मृतिः गजेंद्रमोक्षणंचैवपंचरत्नानिभारते ५९॥
इतिश्रीमहाभारतेशतसहस्रसंहितायांवैय्यासिक्यांशांतिपर्वणिगजेंद्रमोक्षसंपूर्णः
शुभंभवतु श्रीरस्तु श्रीकृष्णार्पणमस्तु ओंनमःशिवायाय श्रीरामचंद्रायनमः ॥
यदक्षरपदभ्रष्टंमात्राहीनंचयद्भवेत् तत्सर्वंक्षमेदेवप्रसीदपरमेश्वर १ शिवाय ॥
स्थानेपुरमंडलेदेवकाकिनारेउमापतीसमीपे लिखितंजवाहिरगिरस्येदंपुस्तकंपठ
नार्थे २ श्रीराम जयराम जयजयराम नारायण हरी वासुदेव शिव शिव शिव

६